# संस्कृत-वार्ता:

दिनाङ्क : 23/02/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- राष्ट्रपतिना द्रौपदीमुर्मु-वर्यया राजगोपालाचार्यस्य प्रतिमायाः कृतम् अनावरणम्। राष्ट्रपतिः द्रौपदीमुर्मु राष्ट्रप्रथम-भावनया राजगोपालाचार्यस्य जीवन-रिक्थात् प्रेरणां स्वीकर्तुं देशवासिनः समाहूतवती।
- प्रधानमन्त्रिणा पश्चिमबङ्ग-राज्यस्य जनतां प्रति पत्रं लिखित्वा राज्यस्य विविध-समाह्वानानि उल्लेखितानि । तेन केन्द्रीय-सर्वकारस्य योजनानां विषये प्रकाशः प्रक्षिप्तः,सहैव आगामि-विधानसभा-निर्वाचने समर्थनार्थं मतदातृजना: अध्यर्थिता:।
- तेहरान-स्थितेन भारतीय-दूतावासेन भारतीयानां सुरक्षां ध्यात्वा भारतीय-नागरिकाः ईरान-देशस्य त्यागार्थम् आहूता: ; प्रदर्शन-प्रदेशेषु न गन्तुमपि भारतीया: सञ्चेतिताः।
- बाङ्ग्लादेश-राष्ट्रपतिना मोहम्मदशहाबुद्दीनेन पूर्व-सर्वकारस्य मुख्य-परामर्शके मोहम्मद-यूनुसे सांविधानिक-प्रक्रियालङ्घनस्य आरोपः आरोपितः।
- आईसीसी-पुरुष-वर्गीये विंशतिं प्रतिविंशतिः क्रिकेट्-विश्वचषकीय-स्पर्धायाम् अद्य मुम्बई-नगरे समुत्कृष्ट-अष्ट- समूहनां समरे जिम्बाब्वे-दलस्य वेस्ट-इण्डीज-दलेन सह भविष्यति साम्मुख्यम्।

--------------------------------------

<u>राजाजी-उत्सवः</u>

प्रथम-भारतीय-शासकस्य जीवनस्य रिक्थस्य च राजाजी-उत्सवः अद्य राष्ट्रपति भवने सुतरां परिपाल्यते । अस्मिन् अवसरे राष्ट्रपतिः द्रौपदी मुर्मु नव- दिल्लीस्थिते राष्ट्रपति भवने स्वतंत्र-भारतस्य प्रथमः तथा एक एव भारतीय-"राज्यपालजनरलः" चक्रवर्ती राजगोपालाचारी-वर्यस्य प्रतिमायाः अनावरणं कृतवती।

इयं प्रतिमा अशोक-मंडपस्य समीपस्थे ग्रैंड्-ओपन सोपानं निकषा स्थितास्ति, एषा एडविन् लुटियन्स्- इत्यस्याः प्रतिमायाः स्थाने प्रतिस्थापिता वर्तते।

राष्ट्रपतेः मुर्मु-वर्यायाः कथनानुसारेण एषः उपक्रमः औपनिवेशिक-मानसिकतायाः अवशेषान् परित्यज्य भारतस्य सांस्कृतिक-वैभवस्य, पुरातन-रिक्थानां कालातीतपरम्पराणां च गौरवपूर्ण-सम्मानं स्वीकरोति, अथ च यैः राष्ट्रभक्तैः असाधारण-योगदानैः भारतमातुः सेवा कृता तेषां सम्मानार्थम् अपि एषः उद्यमः श्लाघनीयः अस्ति। एषः उपक्रमः भारतस्य गौरवपूर्ण इतिहासस्य स्मरणं कारयति, राष्ट्रभक्तानां वीरतायाः, सेवाभावस्य, सांस्कृतिक-परम्पराणां च अमूल्ययोगदानं जनसमक्षं प्रस्तौति। अत्रावसरे राष्ट्रपतिना आशा व्यक्तीकृता यत् देशवासिनः राजगोपालाचार्यस्य जीवन- रिक्थेन प्रेरिताः सन्तः राष्ट्रं सर्वोपरि मत्वा, राष्ट्रभक्तिभावेन अग्रे प्रगच्छेयुः।

अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् राजाजी उत्सवः एकः अद्भुतः उपक्रमः अस्ति, येन राष्ट्राय सी. राजगोपालाचारी वर्यस्य समृद्धस्य योगदानस्य विभिन्नाः पक्षाः प्रकाश्यन्ते। सामाजिक-अन्तर्जालीये पटले लिखिते सन्देशे प्रधानमन्त्रिणा राजाजी-उत्सवं प्रशंसता उक्तं यत् अयं प्रयासः, नियति-निर्धारकेभ्यः सम्मानं प्रददाति। सः अवोचत् यत् राजाजी महान् विद्वान्, स्वातन्त्र्ययोद्धा, चिन्तकः, प्रशासकः च आसीत्।

---------------------------------------

## पश्चिमबङ्गविषये प्रधानमन्त्रिणः पत्रम्

प्रधानमन्त्री नरेन्द्रमोदी पश्चिमबङ्गराज्ये आगामि-विधानसभा-निर्वाचनस्य पूर्वसन्ध्यायां राज्यजनतां प्रति मुक्तपत्रं प्रेषितवान्। तेन पत्रे गतदशके केन्द्र-सर्वकारस्य जनकल्याण-विकास-परियोजनानां विवेचनं कृतम्।

प्रधानमन्त्रिणा तस्मिन् पत्रे जन-धन-योजना, उज्ज्वला-योजना, आयुष्मान-भारत-योजना, स्वच्छ-भारत-अभियानम् इत्यादीनां योजनानां उल्लेखः कृतः। तेन उक्तं यत् असंख्य-परिवाराः बैंक-सेवा, महानसीय-वात-ईन्धन-संयोजनं, सुलभ-स्वास्थ्य-सेवां च प्राप्तवन्तः सन्ति।

कृषक-कल्याणात् युव-सशक्तीकरण-पर्यन्तं, अवसंरचना-विकासात् औद्योगिक-निवेश-वृद्धि-पर्यन्तं, विविध-क्षेत्रेषु सततं कार्यं कृतमिति प्रधानमन्त्रिणा प्रोक्तम्। पत्रे नागरिकता-संशोधन-

अधिनियमः तथा सीमासुरक्षा-विषयः अपि उल्लिखितः। प्रधानमन्त्रिणा जनानाम् आह्वानं कृतं यत् राज्यस्य भावि-पीठिकायाः कर्णधाराणाम् उज्ज्वल-भविष्यार्थम् अस्माभिः जनतायाः समर्थनं अपेक्ष्यते।

---------------------------------------

## प्रधानमन्त्री एआई इम्पैक्ट शिखरसम्मेलनम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना नवदिल्ल्यां आयोजितस्य इण्डिया एआई इम्पैक्ट समिट् इत्यस्य समापनावसरे ऐतिहासिकस्य अस्य शिखर-सम्मेलनस्य प्रशंसा कृता। तेन उक्तं यत् अस्मिन् कृत्रिम-बुद्धिमत्ता-समागमे भारतस्य प्रौद्योगिकीय-क्षेत्रस्य सामर्थ्यं वैश्विक-स्तरे प्रशंसितम्। एआई इम्पैक्ट समिट् इति कृत्रिममेधा-शिखरोपवेशनस्य समापनं "नवदिल्ली-घोषणापत्रस्य" स्वीकरणेन साकम् अभवत्, यत् कृत्रिममेधायाः वैश्विक-सहकार्यं महत्त्वपूर्ण-कोषीयस्तम्भत्वेन सिद्धम्।

---------------------------------------

## तेहराने भारतीय-नागरिकानां कृते यात्रासूचना सङ्केतना

ईरानदेशस्य राजधान्यां स्थितेन भारतस्य राजदूतावाससेन #Tehran #Iran तत्र स्थिताः सर्वेSपि भारतीय-नागरिकाः विनिर्दिष्टाः यत्ते यथोपलब्ध-यातायात-साधनैः, यथा वाणिज्यिक-उड्डयन-विमानैः तस्मात् देशात् निर्गच्छन्तु इति।

दूतावासेन जनवरी चतुर्दश्यां प्रसारिता स्व-सूचना पुनः प्रख्यापिता अस्ति, यत्र सर्वे भारतीय-नागरिकाः भारतीय-मूलस्य जनाः च सतर्काः सावधानाः च भवितुम् अध्यर्थिताः सन्ति। साकमेव विरोध-प्रदर्शनस्य क्षेत्रेभ्यः दूरे स्थातुमपि ते प्रार्थिताः वर्तन्ते। अथ च दूतावासेन साकं संपर्कः स्थातवपयितुमपि जनाः सन्ति प्रार्थिताः। युगपदेव जागरूकीभूय च स्थानीय- सञ्चार-माध्यमेषु अपि कुत्र किं किं जाजायते इति विषये निरीक्षणं कर्तुं जनाः सन्ति निर्दिष्टाः।

अत्रान्तरे यात्रा-प्रपत्रकाणि परिचय-पत्राणि च भारतीया: सर्वदा स्वपार्श्वे एव स्थापयन्त्वित्यपि विनिर्दिष्टमस्ति। सङ्कटापन्ने क्षणे जनानां सहायतार्थं दौरभाषयन्त्रस्य सहायता-संख्याश्चापि प्रसारिता: सन्ति -

प्रधानमन्त्री मोदी वर्य: अपि नागरिक-सुरक्षायाः महत्त्वं निध्याय समग्रे घटनाक्रमे नैजीं दृष्टिं स्थापयति।

---------------------------------------

<u>बाङ्ग्लादेश</u>

बाङ्ग्लादेश-राष्ट्रपतिना मोहम्मद-शहाबुद्दीनेन पूर्व-सर्वकारस्य मुख्य-परामर्शके मोहम्मद-यूनुसे सांविधानिक-प्रक्रियालङ्घनस्य आरोपः आरोपितः। मोहम्मद् शहाबुद्दीनेन मुहम्मद् यूनुसे पुन: पुन: सांविधानिक -प्रक्रियाणां उल्लंघनस्य सम्यक्तया तेषां न परिपालनस्य च आरोपा: आरोपिता: । एकस्यां वार्तापत्रिकायां प्रदत्ते साक्षात्कारे, सः यूनुसे पर्याप्तं समर्थनं विना, आपत्कालिकान् आवश्यकोपायान् च विना अनेकेषाम् अध्यादेशानां प्रवर्तनस्य आरोपपूर्वकं तस्य निन्दाम् अकरोत्।

---------------------------------------

<u>अमित शाहः भारत-टैक्सी</u>

केन्द्रीय-मन्त्री अमित शाहः भारत-टैक्सी समवायस्य सारथिभिः सह मिलित्वा अस्या: सहकार-संस्थायाः उद्देश्यान् परिचर्चितवान् । असौ उदैरयत् यत् भारत-टैक्सीति समवाय: केवलं लाभार्जनाय नास्ति, किन्तु सारथिनाम् आर्थिक-सशक्तीकरणं कर्तुमपि अस्य लक्ष्यमस्ति। सारथयः एव अस्य संस्थायाः वास्तविका: स्वामिन: सन्ति। अस्य लक्ष्यं अस्ति यत् ते स्वगृहपरिवारस्य सुचारु-संचालनं कर्तुं समर्थाः स्युः साकमेव अधिकतमं लाभमपि प्राप्नुयु:।

तत्रैव प्रशासनेतर समवाया: केवलं समवाय-स्वामिनां समृद्धिवर्धने निरता: भवन्ति, परन्तु भारत-टैक्सी समवाये स्वामिनः अपि सारथय: एव भवन्ति अत: त एव लाभं प्राप्नुवन्ति। एवं प्रकारेण एषा सहकार-संरचना अन्य समवायानाम् अपेक्षायां भिन्नतया वर्तते स्थापिता।

---------------------------------------

**सर्बानन्दसोनोवालः**

केन्द्रीय-जलपोतयान-जलमार्गमन्त्रिणा सर्बानन्द-सोनोवालेन अद्य तमिलनाडु-राज्यस्य तूतीकोरिन्-पोतपत्तने प्रायः पञ्चदशशत-कोटिरूप्यक-मूल्यानां विविध-पत्तन-परियोजनानाम् उद्घाटनं शिलान्यासश्च कृतः।

एतासु परियोजनासु वी.ओ.सी.-सामुद्रिक-रिक्थ-संग्रहालयस्य निर्माणम्, अष्ट-मेगावाट-क्षमतायुक्त-पवन-ऊर्जा-संयन्त्रस्य स्थापना, प्रतिहोरं पञ्च-मेगावाट-क्षमतायुक्त-विद्युत्-सञ्चयन-प्रणाल्याः शिलान्यासः, पत्तने कॉर्पोरेट-सामाजिक-उत्तरदायित्व-परियोजनानां शुभारम्भश्च समाविष्टाः सन्ति।

---------------------------------------

**नेपालदेशे चरौण्डीक्षेत्रं निकषा भीषण-बस-दुर्घटना :**

नेपालदेशे चरौण्डी-नामकं स्थानं निकषा अद्य प्रातः काले भीषणः बस-यान-दुर्घटना अभवत्। पोखरातः काठमाण्डू-नगरं प्रति गच्छत् यात्रिवाहि-बसयानम् अकस्मादेव मार्गात् अपसृत्य त्रिशूली-नद्यां निपतिता। दुर्घटनायाः अनन्तरं क्षेत्रे तुमुल-कोलाहलः अभवत्। प्रत्यक्षदर्शिनां कथनानुसारेण बसयानं तीव्रवेगेन धावमानम् आसीत्, येन तत् सहसैव नियन्त्रणहीना अजायत।

अधिकृत-सूचनानुसारेण एतस्यां दुर्घटनायां न्यूनातिन्यूना: सप्तदश यात्रि-जनाः मृत्युम् उपगताः सन्ति, येषु द्वौ वैदेशिक-नागरिकौ अपि स्तः। अथ च एकादशान्ये पुरुषाः द्वे स्त्रियौ च

मृतकेषु अन्तर्भूताः सन्ति। अन्येषां मृतकानां परिचय-निर्णय-कार्यं अधुनापि प्रवर्ततेतराम्। बहवः यात्रिकाः गम्भीरतया व्रणिताः आहताश्च सन्ति, ये समीपस्थेषु चिकित्सालयेषु एव उपचारार्थं प्रवेशिता: सन्ति।

दुर्घटनानन्तरं स्थानीय-प्रशासनं , सुरक्षादलानि , उद्धार-दलानि शीघ्रमेव घटनास्थलं प्राप्य जनोद्धारकार्येषु निरतानि सन्ति। इमे सहायका: जना: नद्याः अन्तस्तले अपि अन्वेषण-कार्यं कुर्वन्तो वर्तन्ते। दुर्घटनायाः यथार्थं कारणं ज्ञातुं आधिकारिक-अनुसन्धानं प्रारब्धम् अस्ति। अनया दुःखदया घटनया सम्पूर्णे नेपालदेशे शोक-तरङ्गा: प्रसारिता: सन्ति।

---------------------------------------

<u>ईरान–अमेरिका-परमाणु-मन्त्रणा पुनरारब्धा</u>

ईरान-देशः संयुक्त-राज्य-अमेरिका-देशश्च अस्य मासस्य षड्विंशे दिने जेनेवा-नगरे परमाणु-सम्बद्ध- मन्त्रणां पुन: समारब्धुं सज्जौ जातौ, यद्यपि तेहरानस्य परमाणु-कार्यक्रमं समावलम्ब्य उभयोः देशयोः मध्ये आपीड: निरन्तरं वर्धतेतमाम्।

ईरान-देशस्य विदेशमन्त्रिण: अब्बास-आराघचीत्यस्य अमेरिकीय-विशेष-दूतस्य स्टीव-विटकॉफस्य च मध्ये मुखामुखीभूय मन्त्रणा भविष्यति इति सम्भाव्यते। ध्येयमस्ति यद् उभावपि पक्षौ पूर्वमपि द्विवारं परमाणुविषयं सन्दृभ्य मन्त्रितवन्तौ । प्रथमं मन्त्रणोपवेशनं तावत् ओमान-देशे अनुष्ठितनासीत्, ततः फेब्रुवरी-मासस्य सप्तदशे दिनाङ्के जेनेवा-नगरे मन्त्रणोपवेशनं समनुष्ठितं यत्र सम्भावित-साहमत्यस्य कृते व्यापक-मार्गदर्शक-सिद्धान्तेषु सहमतिः जाता आसीत्।

---------------------------------------

<u>आईसीसी पुरुषवर्गीय विंशतिं-प्रतिविंशति विश्वचषकस्पर्धा</u>

आईसीसी-क्रिकेट्-शृङ्खलायाः पुरुषवर्गे विंशतिं-प्रतिविंशति-विश्वचषकस्पर्धा अद्य उत्कृष्ट-अष्ट-दलानां समूहस्य प्रथमगणे भारत-दक्षिणाफ्रीका-दलयोः स्पर्धा मुम्बईस्थिते वानखेड़े-क्रीडाङ्गणे भविष्यति। स्पर्धा भारतीय-समयानुसारं सायं सप्तवादने आरभ्यते।

पूर्वं उत्कृष्ट-अष्ट-समरे भारत-दलम् दक्षिणाफ्रीका-दलेन षट्सप्ततिः धावनाङ्कैः पराजितम्। अन्यस्मिन् समरे इङ्ग्लैण्ड-दलेन श्रीलङ्का-दलम् एकपञ्चाशत्-धावनाङ्कैः पराजितम्।

।। इति वार्ता: ।।